শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রী রঙ্গনাথদিৱ্যমণিপাদুকাভ্যাং নমঃ

শ্রীকৱিতার্কিকসিংহস্য সর্ৱতন্ত্রস্ৱতন্ত্রস্য
শ্রীমদ্ৱেঙ্কটনাথস্য ৱেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে

# ॥ সুভাষিতপদ্ধতিঃ অষ্টাৱিংশী ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী রঙ্গনাথদিৱ্যমণিপাদুকাভ্যাং নমঃ

# ॥ সুভাষিতপদ্ধতিঃ অষ্টাৱিংশী ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি ॥

কলাসু কাষ্ঠামাতিষ্ঠন্ ভূম্নে সম্বন্ধিনামপি।
পাদুকা রঙ্গধুর্যস্য ভরতারাধ্যতাং গতা ॥ **28.1** ॥

সন্তঃ স্বদেশপরদেশৱিভাগশূন্যং
 হন্ত স্বৱৃত্তিমনঘাং ন পরিত্যজন্তি।
রাজ্যে ৱনে চ রঘুপুঙ্গৱপাদরক্ষা
 নৈজং জহৌ ন খলু কণ্টকশোধনং তৎ ॥ **28.2** ॥

ব্রহ্মাস্ত্রতামধিজগাম তৃণং প্রযুক্তং
 পুণ্যং শরৱ্যমভৱৎ পযসান্নিধির্ৱা।
পৃথ্ৱীং শশাস পরিমুক্তপদং পদত্রং
 কিং ৱা ন কিং ভৱতি কেলিৱিধৌ ৱিভূনাম্ ॥ **28.3** ॥

অন্যেষু সৎস্বপি নরেন্দ্রসুতেষু দৈৱাৎ
 ভ্রষ্টঃ পদাদধিকরোতি পদং পদার্হঃ।
প্রাযো নিদর্শযতি তৎ প্রথমো রঘূণাং
 তৎপাদযোঃ প্রতিনিধী মণিপাদুকে ৱা ॥ **28.4** ॥

চরণমনঘৱৃত্তেঃ কস্যচিৎপ্রাপ্য নিত্যং
 সকলভুৱনগুপ্ত্যৈ সৎপথে ৱর্ততে যঃ।

নরপতিবহুমানং পাদুকেৱাধিগচ্ছন্
স ভৱতি সমযেষু প্রেক্ষিতজ্ঞৈরুপাস্যঃ ॥ **28.5** ॥

রামে রাজ্যং পিতুরভিমতং সম্মতং চ প্রজানাং
মাতা ৱব্রে তদিহ ভরতে সত্যৱাদী দদৌ চ।
চিন্তাতীতঃ সমজনি তদা পাদুকাগ্র্যাভিষেকো
দুর্ৱিজ্ঞানস্বহৃদযমহো দৈৱমত্র প্রমাণম্॥ **28.6** ॥

নাতিক্রামেচ্চরণৱহনাৎপাদুকা পাদপীঠং
যদ্বাঽঽসন্নং পরমিহ সদা ভাতি রাজাসনস্য।
পূর্ৱত্রৈৱ প্রণিহিতমভূদ্ধন্ত রামেণ রাজ্যং
শঙ্কে ভর্তুর্বহুমতিপদং ৱিক্রমে সাহচর্যম্॥ **28.7** ॥

প্রতিপদচপলাঽপি পাদুকা
রঘুপতিনা স্বপদে নিৱেশিতা।
সমজনি নিভৃতস্থিতিস্তদা
ভৱতি গুণঃ শ্রিযমভ্যুপেযুষাম্॥ **28.8** ॥

গতিহেতুরভূৎ ক্বচিৎপদে স্থিতিহেতুর্মণিপাদুকা ক্বচিৎ।
ন হি ৱস্তুষু শক্তিনিশ্চযো নিযতিঃ কেৱলমীশ্ৱরেচ্ছযা॥ **28.9** ॥

অধরীকৃতোঽপি মহতা তমেৱ সেৱেত সাদরং ভূষ্ণুঃ।
অলভত সমযে রামাৎ পাদাক্রান্তাঽপি পাদুকা রাজ্যম্॥ **28.10** ॥

॥ ইতি শ্রীকৱিতার্কিকসিংহস্য সর্ৱতন্ত্রস্বতন্ত্রস্য
শ্রীমদ্বেঙ্কটনাথস্য ৱেদান্তাচার্যস্য কৃতিষু
শ্রীরঙ্গনাথপাদুকাসহস্রে সুভাষিতপদ্ধতিঃ অষ্টাৱিংশী ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ ॥